## अभिनिष्क्रामति द्वारम् । (८६/१४६६)

तद् इत्येव । [1]तदिति द्वितीयासमर्थादभिनिष्क्रामति इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् अभिनिष्क्रामति द्वारं चेद् तद् भवति । आभिमुख्येन निष्क्रामति अभिनिष्क्रामति । स्रुघ्नमभिनिष्क्रामति [2]कान्यकुब्जद्वारं स्रौघ्नम् । [3]माथुरम् । [4]राष्ट्रियम् । [5]द्वारमभिनिष्क्रमणक्रियायां करणं प्रसिद्धं, तदिह स्वातन्त्र्येण विवक्ष्यते, यथा साध्वसिश्छिनत्ति इति । द्वारम् इति किम् ? [6]स्रुघ्नमभिनिष्क्रामति पुरुषः ॥

## अधिकृत्य कृते ग्रन्थे । (८७/१४६७)

तदित्येव । [7]अधिकृत्यैतदपेक्ष्य द्वितीया । अधिकृत्य [8]प्रस्तुत्य, आगूर्य इत्यर्थः । तदिति द्वितीयासमर्थादधिकृत्य कृते इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति यत्तत् कृतं ग्रन्थश्चेत् स भवति । सुभद्रामधित्य कृतो ग्रन्थः सौभद्रः । गैरिमित्रः । यायातः । ग्रन्थे इति किम् ? सुभद्रामधिकृत्य कृतः प्रासादः ।

[४६७] [9]लुबाख्यायिकार्थस्य प्रत्ययस्य बहुलम् । (म. भा. २.३१३)

वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता । सुमनोत्तरा । उर्वशी । न च भवति । भैमरथी (म. भा. २.३१३) ॥

## शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः । (८८/१४६८)

तदित्येव, अधिकृत्य कृते ग्रन्थे इति च । शिशुक्रन्दादिभ्यो द्वितीयासमर्थेभ्यः छः प्रत्ययो भवति अधिकृत्य कृते ग्रन्थे[10] । अणोऽपवादः । शिशूनां क्रन्दनं शिशुक्रन्दः, तमधिकृत्य कृतो ग्रन्थः शिशुक्रन्दीयः । यमस्य सभा यमसभम्[11], यमसभीयः । [12]द्वन्द्वात् – [13]अग्निकाश्यपीयः । [14]श्येनकपोतीयः । [15]शब्दार्थसम्बन्धीयं प्रकरणम् । वाक्यपदीयम् । इन्द्रजननादिभ्यः – [16]इन्द्रजननीयम् । प्रद्युम्नागमनीयम् । इन्द्रजननादिराकृतिगणः प्रयोगतोऽनुसर्तव्यः, प्रातिपदिकेषु न पठ्यते ।

[४६८] द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः[17] । (म. भा. २.३१४)

दैवासुरम् । राक्षोऽसुरम् । गौणमुख्यम् ।

इन्द्रजननादेराकृतिगणत्वात् शिशुक्रन्दादयोऽपि तत्रैव [18]द्रष्टव्याः । प्रपञ्चार्थमेषां ग्रहणम् । एवं [19]सति देवासुरादिप्रतिषेधो[20]ऽपि न वक्तव्यः, तत[21]श्छप्रत्ययस्यादर्शनात् ॥

---

1. तदिति नास्ति क. ड. 2, कान्यकुब्जस्य फ. 3. नास्ति फ. 4. राष्ट्रीयम् ह. 5. द्वारमभिनिष्क्रामति इति फ. 6. स्रौघ्नम् फ. 7. अधिकृत्यैतदपेक्षया फ. ह, अधिकृत्य इति ड. 8. प्रस्तुत्य नास्ति फ, आरभ्य ड, अवगूर्य ह. 9. लुबाख्यायिकाभ्यः फ, लुबाख्यायिकादिभ्यः ड, लुबितिहासेभ्यः ह. 10. इत्येतस्मिन्नर्थे इत्यधिकम् फ. 11 तदधिकृतो ग्रन्थः इत्यधिकम् फ. 12. द्वन्द्वात् नास्ति फ. 13. अत्रिकाश्यपीयः ड, अग्निकाश्यपीयम् क. 14. श्येनकपोतीयम् क. 15. शब्दार्थीयम् फ. 16. सीतान्वेषणीयः इत्यधिकम् ब.क.ड, न्द्रजननीयः प्रद्युम्नगमनीयः ब. क. 17. वक्तव्यः इत्यधिकम् फ. 18. पठितव्याः ह. 19. च इत्यधिकम् क. फ. 20. अपि नास्ति ब. क. फ. 21. छस्यादर्शनात् फ.